# भूषणसार

**१.फलस्य लक्षणं विलिक्ष्य क्रियायाः भेदं निरूपयत ।**

महावैयाकरणेन रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन शब्दकौस्तुभे वर्णितं विषयमादाय संक्षेपेण सरलतया तदालोचनं क्रियते। अत्र **'फलव्यापारो धात्वर्थः'** इति स्पष्टीकृतः । अर्थात् फलव्यापारयोः वाचकः धातुः। अत्र फलं नामविक्लित्यादि तल्लक्षणमाह- **"तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थत्वं फलत्वम्।"** अर्थात् यद् धात्वर्थव्यापारेणोत्पद्यते तदेव फलमिति। यथा – पच् धातोरर्थः विक्लित्यादि। तत्र पच् धातोः फुत्कारादिव्यापारद्वारा प्रसुतेन विक्लिति जायते। तस्मात् कथ्यते फलं नाम विक्लित्यादि।

धातोः अपरांशः भवति व्यापरः। यः भावना-अभिधा-साध्यत्वेन अभिधीयमाना क्रिया इति उच्यते। तदर्थं वाक्यपदीये उक्तं यत्-

**"यावत्सिद्धमसिद्धं वा साद्ध्यत्वेनाऽभिधीयते**
**आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥"** **( वाक्यपदीय,३,क्रि.स.श्लोक )**

व्यापार लक्षणं तु **'तद्धात्वर्थ फलजनक्त्वे सति तद्धातुवाच्यत्वं व्यापारत्वं।'** अर्थात् यः धातोः फलांशमुत्पादयति अपि च धातुवाच्य भवति सः भवति व्यापारः। उदाहरणं यथा- फुत्कारादिद्वारा व्यापारेण पच्-धातोः फलांशः विक्लितिः उत्पद्यते। सारांशतया यः व्यापारः वाक्यपदीयकारानुसारेण सिद्धक्रिया साद्ध्यक्रियाभावेन स्वीकृतः अस्ति।

यदि साध्यत्वेन अभिधाने मानाभावः इति प्रश्नः क्रियते तर्हि पचति, पाकः, करोति,कृति इत्यादौ धात्वर्थावगमेन क्रियान्तराकाङ्क्ष्यायाऽनाकाङ्ख्ययोः भावोत्पन्नात् प्रमाणं समुपजायते। अर्थात् क्रियान्तराकाङ्ख्ययाऽनुत्थापकतारूपत्वं साध्यत्वम्। अत्र साध्यक्रियायां क्रियान्तराकाङ्ख्ययाः अपेक्षा न वर्तते। यथा- पचति। तत्र क्रियान्तराकाङ्ख्या उत्थापकताऽवच्छेदकरूपत्वं वर्त्तते तत् साध्यत्वम्। यथा- पाकः इति। अत्र पाकः उच्चारणेन पाकः भवति भविष्यति वा इति आकाङ्ख्या वर्त्तते। एतदेव आदाय वाक्यपदीये भर्त्तृहरिणा उक्तं यत्-

**"सत्व-स्वभावमापन्ना व्यक्तिर्नामभिरूच्यते**
**असत्व-भूतो भावश्च तिङ् पदैरभिधीयते ॥"** **(वा. २. )**

अर्थात् क्रिया यदा द्रव्यस्वभावं धारयति तदा विभक्त्यादि योगयुक्ता भवति।

सिद्धसाध्यक्रियाभूत व्यापारः – अयं च व्यापारः फूत्कारत्वऽधः धसन्तापनत्वे यत्नत्वादि तत्तद्रूपेण वाच्यः। अर्थात् अनेकव्यापारयुक्तः भवति अयं व्यापारः। यः अवयवसमूहः क्रमजन्मनामनेकत्वेऽपि बुद्धौ एकत्वेन परिकल्पिता । उक्तश्च वाक्यपदीये-

**" गुणभूतैरवयवैः समूहः क्रमजन्मनाम्**
**बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते ॥"**
(वा. ३,)

## २. कर्त्तृकर्मणोः तिङर्थत्वे किं मानं स्पष्टीकुरुत ?

वैयाकरणानां मतेन धात्वर्थनिरूपणावसरे प्रतिपादितं यत् फलव्यापारयौ धात्वर्थः, कर्त्तृकर्मसंख्याकालाः तिङर्थः । अत्र पूर्वपाक्षिकेन प्रश्नः क्रियते यदि तिङर्थे कर्त्तृकर्मद्वयमस्ति चेत् किं तत् प्रमाणम् इति मीमांसकाः आक्षेपयन्ति- तेषां मतेन धात्वर्थः फलम् आख्यातार्थः भावना (व्यापारः) अस्ति। कर्त्तृकर्मादयः न तिङर्थः भवन्ति ।

प्रसङ्गेऽस्मिन् वैयाकरणाः वदन्ति- प्रतीतिद्वारा एव कर्त्तृकर्मणोः तिङर्थः इति विचार्यते। यथा- पचति, पठति,करोति चेत्यादिनां पदानामुच्चारणेन कर्त्तृपदस्यान्वयः जायते। तथैव कर्मवाच्ये पच्यते, पठ्यते, क्रियते चेत्यादौ कर्मणः अन्वयः स्पष्टतया सर्वेषां कृते प्रत्यक्षेन अनुभवसिद्धः अन्वयसिद्धः वा जायते।

**लक्षणया-** प्रसङ्गेस्मिन् मीमांसकानां मतं तु भिन्नम् । यदि प्रतीतिद्वारा कर्त्तृकर्मणोः तिङर्थः स्वीक्रियते किमर्थं लक्षणद्वारा तयोः ग्रहणं न । यथा- **'गङ्गायां घोषः'** इत्युक्ते मुख्यार्थबाधे गङ्गायां घोषः असम्भवात् लक्षणया गङ्गायां तटदेशे घोषः तिष्ठति इति निर्णियते, तथैव आख्यातार्थे कर्त्तृकर्मणोरभावे लक्षणया तयोः प्रतीतौ न दोषः ।

**आक्षेपात्-** येन विना यदनुपपन्नः तत्तेन कल्प्यते । अर्थात् यद् विना यत् कार्यं न सिद्ध्यति तत् तेनैव परिकल्प्यते । कथ्यते अत्र उदाहरणमुखेन – **'पीनोऽयं देवदत्तः दिवा न भुङ्क्ते'** अर्थात् देवदत्तः दिवसे अभुक्त्वाऽपि पृथुलः वर्त्तते । तेन ज्ञायते देवदत्तः सुस्थत्वात् रात्रौ भुङ्क्ते। तथैव अत्र तिङर्थे कर्त्तृकर्मणोरभावेऽपि भावबोधनात् आक्षेपात् ज्ञायते ।

**प्रथमान्तपदात् वा-** नैयायिकानां मते- पचति,पठति कथनेन कर्त्तृपदस्य देवदत्तः बालकः कश्चिद्वा एकस्य प्रथमान्तपदस्यान्वयः जायते। तस्मात् कर्त्तृबोधः भवति, तथैव पठ्यते, पच्यते इत्यादौ वाक्यार्थ उपयोजनार्थं कर्मपदस्य प्रथमान्तत्वेन समन्वयः जायते ।

अतएव प्रथमान्तपदेन हि कर्त्तृकर्मणोः बोधः जायते। अतः आख्यातार्थे कर्त्तृकर्मणोः ग्रहणं न युक्तम् इति त्रिभिः प्रकारैः वैयाकरणानां मतखण्डनार्थं मीमांसकैः यत् युक्तिः उपस्थाप्यते तस्मिन् वैयाकरणानामरुचिः दृश्यते खण्ड्यते च । समाधानार्थमुच्यते यत् कर्त्तृकर्मणोः बोधः तिङर्थत्वेन भवतीति **"लः कर्मणि च भावे चाकर्मकेभ्य"** इति पाणिनि सूत्रात् ज्ञायते। अत्र सूत्रे चकार प्रयोगवलात् **"कर्तरि कृत्"** इत्यतः पूर्वसूत्रात् कर्त्तरि इति द्विवारः अनुवर्त्तते । तस्मात् अर्थो जायते लकाराः सकर्मकेभ्यः कर्त्तरिकर्मणि अकर्मकेभ्यः भावे कर्त्तरि च स्युः। अतः बोधकतारुपां तिबादि शक्तिं तत् स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणिकर्त्तरि चाऽनेन विधीयन्ते। यथा- णकारादिषु कर्माद्यर्थः प्रतीयते , परन्तु व्याकरणप्रक्रियानुसारेण शसादीनां परिकल्पनं वर्त्तते । अत्र हि तथा उभयोः सूत्रयोः समन्वयकरणार्थं कर्त्तृकर्मणोः अर्थः तिङर्थः इति स्वीकृतम् ।

**३. “फलव्यापारयोस्तत्र फले तङ्-यक्-चिणादयः**

**व्यापारे श्प्श्नमाद्यास्तु द्योतयन्त्योश्रयान्वयम् ॥”**

**इति कारिकायाः व्याख्या कार्या।**

ननु आक्ष्यात् कर्त्तृकर्मणोः शक्तत्वेऽपि पचति इत्यादौ एकस्मिनेव काले कथम् उभयोः बोधापत्तिः न भवति इत्याशङ्कया भूषणसारे कारिकेयमुद्धृता ।

यस्यार्थः भवति तङ्, यक्, चिण् आदि प्रत्यययुक्तेषु क्रियापदेषु फलस्याश्रयकस्यकर्मणोः बोधः भवति। शप्शनम् आदि प्रत्यययुक्तेषु क्रियापदेषु व्यापाराश्रयकस्य कर्त्तुः अन्वयः जायते इति उत्सर्गं ओरकटितम् । तस्मात्कारणात् क्रियापदेषु एकस्मिन् समये उभयोः प्रतीतिः न जायते।